**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

**सत्रान्तपरीक्षा – नवम्बर/दिसम्बर, २०१६**

कक्षा – शास्त्रितृतीयवर्षम् (SEM-५) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – वेद: **कोड – C.C.3.5.9** समयः – ११:०० तः २:००

दिनाङ्कः – २९-११-२०१६ सन्दर्भग्रन्थः – वैदिकसाहित्येतिहासः

---

**प्रथमान्वितिः**

**प्रश्नः -१ अधोलिखितेषु द्वयोः व्याख्या विधेया।** ०८

१. यागादिरेव धर्मः।

२. इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेद।

३. अङ्गानि वेदश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्याह्येताश्चतुर्दश॥

४. ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।

**प्रश्नः -२ वेदशब्दस्य व्युत्पत्तिं विलिख्य यजुर्वेदस्यविषयान् विवृणुत।** ०८

**अथवा**

**अथर्ववेदस्य महत्त्वं वर्णयत।**

**प्रश्नः -३ अधोलिखितेषु द्वयोः टिप्पणीं लिखत।** ०४

१. पूर्वार्च्चिकम् ३. सामगानपद्धतिः

२. उपवेदाः ४. ऋग्वेदस्य सम्बादसूक्तानि

**प्रश्नः -४ अधोलिखितेषु पञ्चप्रश्नाः समाधेयाः।** ०५

१. ऋक्–शब्दस्य कोऽर्थः ?

२. ऋग्वेदस्य ऋत्विक् कः ?

३. काण्वशाखा-सम्बद्धः वेदविशेषः कः ?

४. षड्मन्त्रात्मकं शिवसंकल्पसूक्तं माध्यन्दिनसंहितायाः कस्मिन् अध्याये प्रप्यते ?

५. ‘सर्पवेदः’ कस्योपवेदः वर्तते ?

६. सामवेदस्य कति शाखाः इदानीं समुपलभ्यन्ते ?

७. मेधासूक्तस्य समावेशः कस्मिन् वेदे भवति?

**द्वितीयान्वितिः**

**प्रश्नः -५ शतपथब्राह्मणस्य विषयवस्तु प्रस्तूयताम्।** ०८

**अथवा**

**ब्राह्मणसहित्यस्य विवरणं दत्त।**

**प्रश्नः -६ अधोलिखितेषु द्वयोः व्याख्या विधेया।** ०८

१. नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम्।
प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते॥

२. अज्ञातार्थज्ञापको वेदभागो विधिः।

३. हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः
परक्रिया पुराकल्पो व्यवधारणकल्पना ॥
उपमानं दशैते तु विधयो ब्राह्मणस्य तु ।

**प्रश्नः -७ द्वयोः टिप्पणी कार्या ।** ०४

१) तैत्तिरीयब्राह्मणम् ३) ऐतरेयब्राह्मणम्
२) आर्षेयब्राह्मणम् ४) अर्थवादः

**प्रश्नः -८ अधोलिखितेषु पञ्च प्रश्नाः समाधेयाः ।** ०५

१. के सन्ति यजुर्वेदस्य ब्राह्मणग्रन्थाः ?
२. मन्त्रब्राह्मणस्य सम्बद्धः केन वेदेन सह वर्तते ?
३. अथर्ववेदस्य ब्राह्मणग्रन्थस्य नाम किम् ?
४. पंचविंशब्राह्मणस्य नामान्तरं किमस्ति ?
५. ऐतरेयब्राह्मणस्य रचयिता कः ?
६. कौषीतकिब्राह्मणस्य अपरं नाम किमस्ति ?
७. ब्राह्मणभागस्य मुख्यप्रतिपाद्यविषयः किमस्ति ?

**तृतीयान्वितिः**

**प्रश्नः -९ उपनिषदां दार्शनिकमूल्यं प्रतिपादयत ।** ०८

**अथवा**

**ईशोपनिषदि दृश्यमानमात्मतत्वं विवेचयत ।**

**प्रश्नः -१० अधोलिखितेषु द्वयोः व्याख्या विधेया ।** ०८

१. तत्त्वमसि ३. स्वाध्यायान्मा प्रमदः
२. क्रतो स्मर कृतꣳ स्मर ४. आत्मानं रथिनं विद्धि

**प्रश्नः -११ एकस्य टिप्पणीं लिखत ।** ०२

१. मुण्डकोपनिषद् २. छान्दोग्योपनिषद्

**प्रश्नः -१२ द्वयोः उत्तरं लिखत ।** ०२

१) 'एजति'इति शब्दस्य कोऽर्थः ?
२) उपनिषच्छब्दस्य कोऽर्थः ?
३) 'सनत्कुमार-नारदसम्वादः' कुत्र मिलति ?
४) कठोपनिषदः सम्बद्धः केन वेदेन सह वर्तते ?

***